अनिवार्यपत्रम् । शास्त्री-II 23-08-2020

व्याकरणाद्यतिरेक्तार्थः । रघुवंशम् । श्लोकव्याख्या ।

"पुत्रो रघुस्तस्य पदं प्रशास्ति महाक्रतोर्विश्वजितः प्रयोक्ता ।
चतुर्दिगावर्जितसम्भृतां यो मृत्पात्रशेषामकरोद्विभूतिम् ॥"

सन्दर्भः → प्रस्तुतमिदं पद्यं कविकालिदासप्रणीतस्य षष्ठसर्गस्येन्दुमती-स्वयंवरवर्णनप्रसङ्गादवतरितमस्ति ।

प्रसङ्गः → कविरत्र सुनन्दामुखेनेन्दुमतीं प्रति अजस्य परिचयप्रसङ्गे रघोः दानवीरत्वं प्रतिपादयति ।

अन्वयः → विश्वजितः महाक्रतोः प्रयोक्ता तस्य पुत्रः रघुः पदं प्रशास्ति, यः चतुर्दिगावर्जितसम्भृतां विभूतिं मृत्पात्रशेषाम् अकरोत् ।

शब्दार्थः व्याकरणञ्च → विश्वजितः = एतन्नामकस्य यज्ञविशेषस्य । महाक्रतोः = महाध्वरस्य । प्रयोक्ता = अनुष्ठाता । तस्य = दिलीपस्य । पुत्रः = सुतः । रघुः = राज्ञः दिलीपस्य पुत्रः । पदं = पैत्रं राज्यम् । प्रशास्ति = पालयति । यः = रघुः । चतुर्दिगावर्जितसम्भृताम् → चतस्रः दिशः, तेभ्यः आवर्जितः सम्भृता चेति, तां = सर्वदिग्संवर्च्चितम् । विभूतिम् = ऐश्वर्यम् । मृत्पात्रशेषाम् = मृत्भाजनावशिष्टाम् । अकरोत् = कृतवान् । विश्वजितः → विश्वं जयति इति, तस्य । मृत्पात्रशेषाम् → मृदः पात्रमेव शेषो यस्याः सा, ताम् ।

तात्पर्यः → विश्वजित्यज्ञकर्ता दिलीपसुतः रघुः चतुर्दिग्भ्यो विजित्य सर्वस्वं धनं यज्ञे वितीर्य केवलं मृत्तिकाभाजनावशेषो जातः ।

विशेषः → अस्मिन् श्लोके शृङ्गाररसः, वैदर्भीरीतिः, माधुर्यगुणः, अनुप्रासालङ्कारः, उपजातिछन्दश्च ।

23-08-2020

डॉ० निर्मल कुमार झा, (स० प्राचार्य)
रा० उ० सं० महावि० सुखसेना, पूर्णियाँ ।

23-08-2020

उपशास्त्री II

संस्कृत सामान्यम् ।

अनिवार्यपत्रम् ।

धातुरूपाणि ।

√ग्रह् - ग्रहणे (लेना, ग्रहण करना)

लट् लकार:

| पुरुष | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथम पु० - | गृह्णाति | गृह्णीत: | गृह्णन्ति |
| मध्यम पु० - | गृह्णासि | गृह्णीथ: | गृह्णीथ |
| उत्तम पु० - | गृह्णामि | गृह्णीव: | गृह्णीम: |

लोट् लकार:

| | | | |
|---|---|---|---|
| प्र० पु० - | गृह्णातु | गृह्णीताम् | गृह्णन्तु |
| म० पु० - | गृहाण | गृह्णीतम् | गृह्णीत |
| उ० पु० - | गृह्णानि | गृह्णाव | गृह्णाम |

लङ् लकार:

| | | | |
|---|---|---|---|
| प्र० पु० - | अगृह्णात् | अगृह्णीताम् | अगृह्णत् |
| म० पु० - | अगृह्णा: | अगृह्णीतम् | अगृह्णीत |
| उ० पु० - | अगृह्णाम् | अगृह्णीव | अगृह्णीम |

विधिलिङ् लकार:

| | | | |
|---|---|---|---|
| प्र० पु० - | गृह्णीयात् | गृह्णीयाताम् | गृह्णीयु: |
| म० पु० - | गृह्णीया: | गृह्णीयातम् | गृह्णीयात |
| उ० पु० - | गृह्णीयाम् | गृह्णीयाव | गृह्णीयाम |

लृट् लकार:

| | | | |
|---|---|---|---|
| प्र० पु० - | ग्रहीष्यति | ग्रहीष्यत: | ग्रहीष्यन्ति |
| म० पु० - | ग्रहीष्यसि | ग्रहीष्यथ: | ग्रहीष्यथ |
| उ० पु० - | ग्रहीष्यामि | ग्रहीष्याव: | ग्रहीष्याम: |

23-08-2020

डॉ० निर्मल कुमार झा (सं० प्राचार्य)
रा० उ० सं० महावि० सुखसेना, पूर्णियाँ

संस्कृतसामान्यम्।

अनिवार्यपत्रम्।

# उपशास्त्री - I

23 - 08 - 2020

## वृद्धव्याघ्र-लुब्धविप्र-कथा।

प्रश्नः → सरलभाषया संस्कृते हितोपदेशस्य वृद्धव्याघ्र-लुब्धविप्रकथा लिखत।

उत्तरम् → एकः वृद्धः व्याघ्रः गलितनखदन्तः स्नानशीलः वन्यजीवान् व्यापादयितुमाहारार्थमसमर्थः दक्षिणारण्यस्य सरस्तीरे करे स्वर्णकंकणं गृहीत्वा गतागतान् लोकान् अकथयत् यत् वंशहीनश्चाहं केनचिद्धार्मिकेणादिष्टः सम्प्रति धर्मं अनुसरामि। इदं सुवर्णकङ्कणं गृह्यताम्। ततः लोभाकृष्टेन केनचित् पान्थेनालोचितम् → व्याघ्रः मानुषं खादति इति लोकप्रवादः दुर्निवारः किन्तु स्वर्णाभूषणं तु भाग्येन संभवति।

ततः लोभवशीभूतः ब्राह्मणपथिकः स्नातुं सरः प्रविशति, पङ्के निमग्नः पलायितुमक्षमः भवति।

पश्चात् वृद्धव्याघ्रः शनैः शनैः समीपं गत्वा तं पथिकं धृतः व्यापादितश्च।

अतएव कथितमस्ति- वेदादि धर्मशास्त्रं पठित्वा अपि जनस्वभावः अपरिवर्तनशीलः भवति। यथा गवां पयः प्रकृत्या मधुरं भवति। अवशेन्द्रियचित्तानां क्रिया हस्तिस्नानम् इव भवति। ज्ञानस्य प्रयोगः वास्तविकजीवने कर्तव्यः, क्रियां विना विद्या भारस्वरूपा भवति। कथितमस्ति यत् नदीनां, शस्त्रपाणीनां, नखिनां तथा शृङ्गिनामुपरि विश्वासो नैव कर्तव्यः। हिंसके व्याघ्रे विश्वासं कृत्वा पथिकः विनष्टः।

(हस्ताक्षर) 23-08-2020

डॉ० निर्मलकुमार झा, (स० प्राचार्यः)।
रा० उ० सं० महावि० सुरवसेना, पूर्णियाँ।